# Brahmanaih Kritam Narmada Stotram

# બ્રાહ્મણૈઃ કૃતં નર્મદાસ્તોત્રમ્

## Document Information

Text title : Brahmanaih Kritam Narmada Stotram

File name : brAhmaNaiHkRRitaMnarmadAstotram.itx

Category : devii, devI, nadI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | AvantyakhaNDa | revAkhaNDa | adhyAya 60/24-36; 38-41||

Latest update : July 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 6, 2025

*sanskritdocuments.org*

# બ્રાહ્મણૈઃ કૃતં નર્મદાસ્તોત્રમ્

તતઃ કેચિત્સ્તુવન્ત્યન્યે જય દેવિ નમોઽસ્તુ તે ॥ ૨૪॥

નમોઽસ્તુ તે સિદ્ધગણૈર્નિષેવિતે નમોઽસ્તુ તે સર્વપવિત્રમઙ્ગલે ।
નમોઽસ્તુ તે વિપ્રસહસ્રસેવિતે નમોઽસ્તુ રુદ્રાઙ્ગસમુદ્ભવે વરે ॥ ૨૫॥

નમોઽસ્તુ તે સર્વપવિત્રપાવને નમોઽસ્તુ તે દેવિ વરપ્રદે શિવે ।
નમામિ તે શીતજલે સુખપ્રદે સરિદ્વરે પાપહરે વિચિત્રિતે ॥ ૨૬॥

અનેકભૂતૌઘસુસેવિતાઙ્ગે ગન્ધર્વયક્ષોરગપાવિતાઙ્ગે ।
મહાગજૌઘૈર્મહિષૈર્વરાહૈરાપીયસે તોયમહોર્મિમાલે ॥ ૨૭॥

નમામિ તે સર્વવરે સુખપ્રદે વિમોચયાસ્માનઘપાશબદ્ધાન્ ॥ ૨૮॥

ભ્રમન્તિ તાવન્નરકેષુ મર્ત્યા યાવત્તવામ્ભો ન હિ સંશ્રયન્તિ ।
સ્પૃષ્ટં કરૈશ્ચન્દ્રમસો રવેશ્ચેત્તદ્દેવિ દદ્યાત્પરમં પદં તુ ॥ ૨૯॥

અનેકસંસારભયાર્દિતાનાં પાપૈરનેકૈરભિવેષ્ટિતાનામ્ ।
ગતિસ્ત્વમમ્ભોજસમાનવક્ત્રે દ્વન્દ્વૈરનેકૈરભિસંવૃતાનામ્ ॥ ૩૦॥

નદ્યશ્ચ પૂતા વિમલા ભવન્તિ ત્વાં દેવિ સમ્પ્રાપ્ય ન સંશયોઽત્ર ।
દુઃખાતુરાણામભયં દદાસિ શિષ્ટૈરનેકૈરભિપૂજિતાસિ ॥ ૩૧॥

વિણ્મૂત્રદેહાશ્ચ નિમગ્નદેહા ભ્રમન્તિ તાવન્નરકેષુ મર્ત્યાઃ ।
મહાબલધ્વસ્તતરઙ્ગભઙ્ગં જલં ન યાવત્તવ સંસ્પૃશન્તિ ॥ ૩૨॥

મ્લેચ્છાઃ પુલિન્દાસ્ત્વથ યાતુધાનાઃ પિબન્તિ યેઽમ્ભસ્તવ દેવિ પુણ્યમ્ ।
તેઽપિ પ્રમુચ્યન્તિ ભયાચ્ચ ઘોરાત્કિમત્ર વિપ્રા ભવપાશભીતાઃ ॥ ૩૩॥

સરાંસિ નદ્યઃ ક્ષયમભ્યુપેતા ઘોરે યુગેઽસ્મિન્કલિનાવસૃષ્ટે ।
ત્વં ભ્રાજસે દેવિ જલૌઘપૂર્ણા દિવીવ નક્ષત્રપથે ચ ગઙ્ગા ॥ ૩૪॥

તવ પ્રાસાદાદ્વરદે વિશિષ્ટે કાલં યથેમં પરિપાલયિત્વા ।
યાસ્યામ મોક્ષં તવ સુપ્રસાદાદ્વયં યથા ત્વં કુરુ નઃ પ્રસાદમ્ ॥ ૩૫॥

ત્વામાશ્રિતા યે શરણં ગતાશ્ચ ગતિસ્ત્વમમ્બેવ પિતેવ પુત્રાન્ ।
ત્વત્પાલિતા યાવદિમં સુઘોરં કાલં ત્વનાવૃષ્ટિહતં ક્ષિપામઃ ॥ ૩૬॥

ઇતિ શ્રીસ્કન્દપુરાણે આવન્ત્યખણ્ડે રેવાખણ્ડે ષષ્ટિતમા- ધ્યાયાન્તર્ગતં
બ્રાહ્મણૈઃ કૃતં નર્મદાસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । આવન્ત્યખણ્ડ । રેવાખણ્ડ । અધ્યાય ૬૦/૨૪-૩૬; ૩૮-૪૧॥

skandapurANa . AvantyakhaNDa . revAkhaNDa . adhyAya 60/24-36; 38-41..

Proofread by PSA Easwaran

---

*Brahmanaih Kritam Narmada Stotram*

pdf was typeset on July 6, 2025

Please send corrections to *sanskrit@cheerful.com*